दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-51 | 1 | दिसम्बर 21, 2024 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१, कलियुगाब्धः ५१२५ हेमन्तऋतुः सूर्यदक्षिणायनम् पौषमासः कृष्णपक्षः षष्ठी तिथिः पौष 7 प्रविष्टांशः मङ्गलमयः भवेत्

2 CM Sukhu: केवलं ३१ मार्च-दिनाङ्के एव नियमिताः भविष्यन्ति वर्षद्वयस्य कार्यकालं पूर्णकर्तारः कर्मचारिणः

3 : युवभ्यः जीविकां याचमानाः विधानसभापरिसरे आन्दोलने उपविष्टाः भाजपा-विधायकाः



4 ।। श्रीरामायणकथा ।। उत्तरकाण्डम्! (सप्तचत्वारिंशः



## सुभाषितम्

पत्रं पुष्पं फलं तोयं,
यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतम्
अश्नामि प्रयतात्मनः॥

हिन्द्यर्थः- श्री भगवान् ने कहा- जो भक्त मेरे लिए प्रेम से पत्र, पुष्प, फल, जल आदि अर्पण करता है, उस निष्काम प्रेमी भक्त का प्रेमपूर्वक अर्पण किया हुआ वह पत्र- पुष्पादि मैं सगुणरूप से प्रकट होकर प्रीतिसहित स्वीकार करता हूँ।

## राजस्थाने जयपुरस्य भाङ्करोटायां गैसटैंकर इति वातीन्धन-वाहक-यानयोः अग्नि-प्रसङ्गे मृतानां सङ्ख्या नव-पर्यन्तं वर्धिता

हिमसंस्कृतवार्ताः। राजस्थाने जयपुरस्य भाङ्करोटा-क्षेत्रे घटितस्य गैसटैंकर इति वातीन्धन-वाहक-यानयोः अग्नि-प्रसङ्गे मृतानां सङ्ख्या नव-पर्यन्तं वर्धिता अस्ति, त्रिंशत् यावत् जनाः घातिताः च सन्ति । अजमेर-राजमार्गस्य समीपे प्रातः षड्वादने वातीन्धन-वाहक-वाहनौ सङ्घटितौ जातौ। घटनायाः अनन्तरं अग्निकाण्डे ऊनत्रिंशत् ट्रक वाहनानि द्वे बसयाने च समेत्य प्रायः चत्वारिंशत् वाहनानि नष्टानि अभवन्। अग्निकाण्डे चत्वारः जनाः घटनास्थले एव मृत्युमुपगताः, अन्ये त्रयः जनाः चिकित्सावधौ मृताः जाताः। अस्याः घटनायाः अन्वेषणाय उच्चस्तरीयसमित्याः निर्माणं कृतम्। अस्माकं संवाददात्रानुसारी घटनायाः अनन्तरं सम्पूर्ण क्षेत्रे अराजकतायाः स्थितिः अभवत्। प्रधानमन्त्री नरेन्द्रमोदी राजस्थानस्य मुख्यमन्त्रिणा भजनलालशर्मणा सह वार्तालापं कृत्वा जयपुरस्य दुर्भाग्यपूर्णस्य अग्निकाण्डस्य विषये पृष्टवान्। प्रधानमन्त्रिणा केन्द्रस्य सर्वसम्भवं सहयोगं प्रदातुम् उक्तम्।

## केन्द्रीय गृहमन्त्री अमितशाहः पश्चिमबङ्गस्य सिलिगुरीनगरस्य रानीडाङ्गायां सशस्त्रसीमाबलस्य एसएसबी कार्यक्रमे मुख्यातिथिरूपेण सम्मिलितः

हिमसंस्कृतवार्ताः। केन्द्रीय गृहमन्त्री अमितशाहः पश्चिमबङ्गस्य सिलिगुरीनगरस्य रानीडाङ्गायां सशस्त्रसीमाबलस्य एसएसबी इत्यस्य एकषष्ठी तमे स्थापनादिवस-कार्यक्रमे मुख्यातिथिरूपेण सम्मिलितः। सः हुतात्म्-वीराणां श्रद्धाञ्जलिम् अर्पितवान्, ततः परम् अभिवादनम् अगृह्णात्। कार्यक्रमे एसएसबी इत्यस्य महानिदेशकः अमृतमोहनप्रसादः अपि उपस्थितः आसीत्। अमितशाहः एसएसबी-कर्मचारिभ्यः वीरतापुरस्कारं अपि प्रदत्तवान्। गृहमन्त्री बङ्गप्रदेशस्य पेट्रापोल्-त्रिपुरा अगरतला क्षेत्राणां एकीकृत चेकपोस्ट इति निरीक्षणस्थले नवनिर्मितस्य आवास-सङ्कुलस्य अपि उद्घाटनं कृतवान्। सः अवदत् यत् एसएसबी नेपाल-भूटान-देशयोः पञ्चाशदधिक चतुः शतोत्तर द्विसहस्र कि.मी. परिमितं यावत् विस्तृत-सीमायाः समर्पणेन रक्षणं तथा मादकद्रव्याणाम् अवैध हस्तान्तरणस्य निरीक्षणम् अपि करोति । सः त्रिषष्ठ्योत्तर ऊनविंशति शततमे वर्षे SSB इति स्थापनाकालादेव इत्यस्य समर्पणस्य निष्ठायाः च प्रशंसाम् अकरोत्।

## लोकसभायाः राज्यसभायाः च अनिश्चितकालं यावत् स्थगनस्य कारणात् संसदः शीतकालीनसत्रं समाप्तम्



हिमसंस्कृतवार्ताः। लोकसभायाः राज्यसभायाः च अनिश्चितकालं यावत् स्थगनस्य कारणात् संसदः शीतकालीनसत्रं समाप्तम्। लोकसभायां यदा सभा आरब्धा, तदा डा. बी. आर्. अम्बेडकर् वर्यस्य विषये केन्द्रीय गृहमन्त्रिणः अमितशाहस्य वक्तव्यस्य विषये विपक्षस्य सदस्याः कोलाहलं कृतवन्तः। कोलाहलस्य मध्ये, अध्यक्षः ओम बिरला सांसदेभ्यः आग्रहम् अकरोत् यत् सर्वे नियमान् कठोरतया पालयन्तु, संसदः कस्मिन् अपि द्वारे विरोधं न कुर्युः इति। सः तान् कस्यापि विचलनस्य सन्दर्भ कार्यजातस्य पूर्वसूचनाम् अददात्। कोलाहलस्य मध्ये, लोकसभया "एकं राष्ट्रम् एकं निर्वाचनं" सम्बद्धौ द्वौ विधेयकौ संसदः संयुक्तसमितेः कृते निर्दिष्टौ । समितौ लोकसभायाः सप्तविंशतिः सदस्याः, राज्यसभायाः द्वादश सदस्याः च सन्ति। समितिः अग्रिमसंसद-सम्मेलनस्य अन्तिम सप्ताहाभ्यन्तरे प्रथमदिवसे एव स्वप्रतिवेदनं सभायां समर्पयिष्यति। पश्चात् अध्यक्षः ओम बिरला सभां अनिश्चितकालं यावत् स्थगितवान्। राज्यसभायाम् अपि प्रातःकाले पक्षस्य विपक्षस्य च मध्ये घोषणां, प्रति-घोषणानां च अनन्तरं कोलाहलपूर्णानि दृश्यानि दृष्टानि । कोलाहलमध्ये सभापतिः जगदीप-धनखडः अपराले द्वादश-वादनं यावत् सभां स्थगितवान्। यदा अपराले उच्चसदनस्य पुनः संयोजनं जातम्, तदा "एकं राष्ट्रम् एकं निर्वाचनं" इत्येतस्य विधेयकस्य विषये संसदः संयुक्तसमितेः कृते द्वादश-सदस्यानां नामाङ्कनस्य प्रस्तावः प्रस्तावितः। सभापतिः जगदीप-धनखडः स्वीये समापन-भाषणे दुःखं प्रकटितवान् यत् अस्मिन् सत्रे निरन्तर-बाधायाः कारणात् उत्पादकता केवलं चत्वारिंशत् प्रतिशतं यावत् आसीत्। असौ अवदत् यत् 'सप्तषष्ठ्युत्तर द्विशत' इत्यस्य नियमस्य अन्तर्गतं प्रस्तावस्य अनुचितप्रक्षेपणं निरशायुतम् अस्ति। पश्चात् धनखड-वर्यः उच्चसदनम् अनिश्चितकालं यावत् स्थगितवान्। गतमासस्य पञ्चविंशतिः दिनाङ्के संसदः शीतकालीन सत्रं प्रारब्धम् आसीत्।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## देशस्य आत्मनिर्भरता, रक्षाक्षेत्रे सामरिकसहभागिता च न केवलं देशस्य सीमायाः रक्षणं करिष्यति अपितु तस्य सामरिक-वैश्विक-सहभागित्वम् अपि सुदृढं करिष्यति-राष्ट्रपतिः

हिमसंस्कृतवार्ताः। राष्ट्रपतिः द्रौपदी मुर्मुः अकथयत् यत्, अधुना भारते प्रौद्योगिकीय-दृष्ट्या उन्नतोपकरणानां निर्माणेन स्वावलम्बनस्य नूतनचरणस्य आरम्भस्य समयः अस्ति। राष्ट्रपतिः सशस्त्रसेवानां स्वावलम्बनाय, आत्मनिर्भर-भारतस्य सङ्कल्पं साकारयितुं च योगदानं कर्तुम् आदिष्टवती। राष्ट्रपतिः मुर्मुः तेलङ्गाना-राज्ये आयोजिते औपचारिक कार्यक्रमे सिकन्दराबाद-नगरस्य प्रतिष्ठित-रक्षा-प्रबन्धन-महाविद्यालयाय president's colours इति राष्ट्रपति-वर्ण-पुरस्कारं प्रदानं कृत्वा सम्बोधितवती ।



Presidential colours इति कस्यापि संस्थानस्य व्यावसायिक-उत्कृष्टतायाः प्रमाणम् अस्ति। राष्ट्रपतिः अवदत् यत् देशस्य आत्मनिर्भरता, रक्षाक्षेत्रे सामरिकसहभागिता च न केवलं देशस्य सीमायाः रक्षणं करिष्यति अपितु तस्य सामरिक-वैश्विक-सहभागित्वम् अपि सुदृढं करिष्यति इति। एषा अकथयत् यत् प्रशासनेन रक्षा-उद्योगस्य स्वदेशीय क्षमतानां वर्धनाय अनेकाः उपायाः कृताः, यद्यपि अस्माकं रक्षाक्षेत्रे निवेशं प्रोत्साहयितुं अनेकाः उपक्रमाः कृताः।

## द्विदिवसीय यात्रायां कुवैतदेशं गमिष्यति प्रधानमन्त्री

हिमसंस्कृतवार्ताः। प्रधानमन्त्री नरेन्द्रमोदी अद्य कुवैत देशस्य आमीर् शेख् मेशल् अल्-अहमद् अल्-जबेर अल्-सबाहू इत्यस्य आमन्त्रणे सति द्विदिवसीय यात्रायां भविष्यति। अस्मिन्नवधौ प्रधानमन्त्री कुवैत देशस्य नेतृभिः सह चर्चा करिष्यति। प्रधानमन्त्री कुवैत देशे भारतीय समुदायेन सह अपि संवादं करिष्यति। अद्य सायङ्काले नवदिल्ल्यां वार्ताहरान् संसूचयन् सचिवः अरुणकुमार-चटर्जी अवदत् यत्, त्रिचत्वारिंशत् वर्षेषु भारतीय-प्रधानमन्त्रिणः कुवैत-देशस्य एषा प्रथमा यात्रा भविष्यति इति। अस्मिन् वर्षे सितम्बर-मासे यू. एन्. जी. ए. इत्यस्य सत्रस्य समये प्रधानमन्त्री सद्यः एव कुवैत-देशस्य युवराजं मिलितवान्।

## CM Sukhu: केवलं ३१ मार्च-दिनाङ्के एव नियमिताः भविष्यन्ति वर्षद्वयस्य कार्यकालं पूर्णकर्तारः कर्मचारिणः



**हिमसंस्कृतवार्ताः - धर्मशाला।** हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् वर्षद्वयस्य अनुबन्धकार्यकालं पूर्णकर्तारः कर्मचारिणः ३१ मार्च दिनाङ्के एव नियमितरूपेण भविष्यन्ति। विधायकः डॉ. जनकराजः, लोकेन्द्रकुमारः, कुमारी अनुराधा राणा, सुरेन्द्र शौरी इत्येतेषां प्रश्नानाम् उत्तरं दत्त्वा मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना उक्तं यत् सम्प्रति षष्टिः प्रतिशतं मूलभूतवेतनं अनुबन्धकर्मचारिभ्यः वेतनरूपेण दीयते। सम्प्रति तेभ्यः वार्षिकवेतनवृद्धिं दातुं सर्वकारेण कोऽपि निर्णयः न कृतः। अनुबन्धकर्मचारिणां वेतन- आयोगस्य अनुशंसानाम् आधारेण वेतनं न दीयते। मुख्यमन्त्री उक्तवान् यत् राज्यस्य विभिन्नविभागेषु रिक्तकार्यपदानि प्रशासनिकावश्यकतानुसारं पूर्यन्ते। मन्त्रिमण्डलस्य उपसमित्या अद्यापि जीविकासृजनार्थं काऽपि अनुशंसा न दत्ता।

## Himachal Vidhan Sabha Session: भू-जोत संशोधनविधेयकं, जीएसटी, आबकारीविभागस्य च अधिकारानां पुनर्सङ्घटनार्थं त्रयः विधेयकाः पारिताः



**हिमसंस्कृतवार्ताः-** हिमाचलप्रदेश- भूमिधारक- अधिकतम- सीमासंशोधन- विधेयकं २०२४ अपि शुक्रवासरे सदने पारितम्। विपक्षः राधास्वामीसत्संगविषये विधेयकं चयनसमित्याः कृते प्रेषयितुम् आहूतवान् आसीत्। चर्चां कृत्वा तत् पारितम्। अस्मिन् काले किञ्चित् विवादः अपि अभवत्। अस्य अन्तर्गतं अधुना ३० एकड़भूमिः अथवा भूमौ निर्मिताः संरचनाः धार्मिकाणां दानार्थं च स्थानान्तरितुं शक्यन्ते। यदि नियमानाम् उल्लङ्घनं भवति तर्हि एतादृशी भूमिः अथवा तस्मिन् निर्मितायाः संरचनायाः अधिकारः सर्वकारः गृह्णीयात्। अस्य संशोधनविधेयकस्य उद्देश्येषु सर्वकारेण स्पष्टीकृतं यत् राधास्वामी सत्संगब्यासः एकः धार्मिकः आध्यात्मिकः च संस्था अस्ति यः सम्पूर्णे देशे स्वकार्यं चालयति। अस्मिन् राज्ये नैतिक- धार्मिक- आध्यात्मिक-शिक्षायाः अनेकानि केन्द्राणि स्थापितानि सन्ति। अस्याः संस्थायाः हमीरपुरमण्डलस्य भोटा इत्यत्र अपि चिकित्सालयं स्थापितम् अस्ति। जनानां कृते स्वास्थ्यसेवाः प्रददाति। अस्याः संस्थायाः भूमिसीमाधिनियमस्य अन्तर्गतम् अनुमानितसीमायाः अतिरिक्तभूमिः अस्ति, या अधिनियमस्य धारा ५ इत्यस्य खण्ड- प्रथमस्य प्रावधानानाम् अन्तर्गतं अपकर्षं प्राप्तवती।

## जीएसटी, आबकारी विभागस्य च अधिकारानां पुनर्सङ्घटनार्थं त्रयः विधेयकाः पारिताः

जीएसटी- आबकारी- विभागस्य अधिकाराणां पुनर्सङ्घटनार्थं त्रयः संशोधिताः विधेयकाः शुक्रवासरे हिमाचलप्रदेशविधानसभायां पारिताः। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः गुरुवासरे सदने हिमाचलप्रदेश- यात्रीवस्तुसंशोधनविधेयकं २०२४, करसंशोधनविधेयकं २०२४, मूल्यवर्धितकरसंशोधनविधेयकं २०२४ च प्रस्तुतवान्। शुक्रवासरे सदने त्रयः अपि विधेयकाः पारिताः। एतेषां विधेयकानाम् अन्तर्गतं जीएसटी, आबकारी विभागस्य च अधिकारिणाम् अधिकाराणाम् उल्लेखः कृतः। पूर्वं जीएसटी आबकारी च एकः एव विभागः आसीत्। किञ्चित्कालपूर्वं सर्वकारेण तानि पक्षद्वये विभक्तम्। जीएसटी-प्रकोष्ठः अञ्चलम् वृत्तं च (जोन एण्ड सर्कल) इत्यस्य अन्तर्गतं कार्यं करिष्यति। आबकारीविभागः जनपदः, अञ्चलं, वृत्तस्य अन्तर्गतं कार्यं करिष्यति। राज्यसर्वकारेण एतयोः पक्षयोः अधिकाराः केन्द्रसर्वकारस्य नियमानुसारं विनियोजिताः सन्ति।

## HP Vidhansabha : विरोधान्दोलने सत्यपि ध्वनिमतेन सर्वकारीय- कर्मचारिनियुक्तिसेवा- नियमविधेयकं पारितम्

**हिमसंस्कृतवार्ताः- धर्मशाला।** सर्वकारीयकर्मचारिणां अनुबन्धसेवाकालः पदोन्नतिं आर्थिकलाभं च दातुं नियमितकालस्य समकक्षं न गणनीयम् इति विधेयकस्य अनुमोदनात् पूर्वं विधानसभासदने चर्चा कृता। चर्चां कृत्वा विपक्षस्य विरोधस्य मध्ये हिमाचलप्रदेश- सर्वकार- कर्मचारिनियुक्ति- सेवानियमविधेयकं ध्वनिमतेन पारितम्। पूर्वं चर्चायां भागं गृहीत्वा भाजपाविधायकः त्रिलोकजमवालः अवदत् यत् सः कर्मचारिणां नियुक्तिनियमेषु संशोधनं आनयत्। २००३ तमस्य वर्षस्य दिसम्बरमासस्य १२ दिनाङ्कात् परं ये अनुबन्धेन नियोजिताः सन्ति तेषां कृते एतत् विधेयकम् आनीतम् अस्ति। सर्वोच्चन्यायालये अपि पराजयं प्राप्य एतत् विधेयकम् आनीतम्। एतत् संशोधनं पूर्ववृत्तप्रभावेन कार्यान्वितं भवति। तस्य पदोन्नतिः किं भविष्यति? एतेन अनुबन्धकर्मचारिणः व्याकुलाः भविष्यन्ति। परदिनात् आरभ्य तस्य कार्यान्वयनस्य विषये सर्वकारः कथयति चेदपि तस्य विचारः अपि कर्तुं शक्यते। तथापि तस्य विषये विपक्षः अपि स्वमतानि प्रस्तौति। एतादृशं संशोधनं सम्यक् नास्ति। एतद् प्रतिग्रहीतव्यम्।

मध्याह्नभोजनविरामानन्तरं विधेयकविषये चर्चायां भागं गृहीत्वा भाजपाविधायकः जीतरामकटवालः अवदत् यत् राज्यस्य विकासे सर्वकारीयकर्मचारिणां महती भूमिका अस्ति। एतादृशेषु संवेदनशीलविषयेषु सर्वकारेण विचारः करणीयः। एतादृशेषु प्रकरणेषु न्यायालये प्रकरणस्य प्रस्तुतीकरणे विलम्बः न भवति। संवैधानिकपीठस्य निर्णयः विचारणीयः। निर्वाचनकाले वर्तमानसर्वकारस्य प्रतिनिधिभिः अपि बहुघोषणाः कृताः। अस्मिन् विषये पश्चात्कालात् एव व्यवस्था कर्तव्या। विधायकः रणधीर शर्मा इत्यनेन उक्तं यत् आयोगेन क्रियमाणायाः परीक्षायाः माध्यमेन अनुबन्धकर्मचारिणां नियुक्तिः अपि भवति। एषः कर्मचारीविरोधी निर्णयः अस्ति। प्रतिष्ठाप्रश्नं न कृत्वा एषः निर्णयः निवृत्तः भवेत्। न च पूर्वानुमानेन न च पश्चात्तापेन प्रयोज्यम्। विधायकः हंसराजः अपि उक्तवान् यत् विधेयकस्य पुनर्विचारः करणीयः।

### मुख्यमंत्री सुखविंदर-सिंहसुक्खुः किमुक्तवान्-

चर्चापश्चात् स्ववक्तव्ये मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् केचन जनाः न्यायालयं गच्छन्ति। एषः लाभः पूर्वतिथितः एव दातव्यः इति न्यायालयात् अपि निर्णयाः आगच्छन्ति। एषः दोषः, सम्यक् क्रियमाणः अस्ति।



अतः अनेकेषां कर्मचारिणां अवनतिः कर्तव्या भविष्यति। केवलं कतिपयाः एव कर्मचारिणः एतत् विषयं उत्थापितवन्तः। एतेन दोषेण लक्षशः कर्मचारिणां अवनतिः न भवेत् इति सः अवदत्। अस्तु, १७ दिसम्बरदिनाङ्के मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः हिमाचलप्रदेश-सर्वकारकर्मचारिनियुक्ति-सेवानियमविधेयकं सदने उपस्थापितवान्। अस्य अन्तर्गतं हिमाचलप्रदेशे कर्मचारिणः अनुबन्धसेवाकालस्य वरिष्ठता, आर्थिकलाभः च न प्राप्स्यति। एषा व्यवस्था २००३ तमात् वर्षात् आरभ्य कार्यान्वितुं गच्छति। अस्य विधेयकस्य आनयनस्य पृष्ठतः एका प्रमुखा चिन्ता राज्यस्य उपरि सम्भाव्यः आर्थिकभारः अस्ति। अनुबन्धसेवाकालस्य लाभं दत्त्वा न केवलं कर्मचारिभ्यः अतिरिक्तसंसाधनानाम् विशालविनियोगः भविष्यति, अपि तु विगतेभ्यः २१ वर्षेभ्यः वरिष्ठतासूचिकायाः पुनरीक्षणमपि भविष्यति। विधेयकस्य अनुसारं नियमितसर्वकारीयकर्मचारिणाम् अनुबन्धनियुक्तानां च हितस्य सामञ्जस्यं विधेयकस्य उद्देश्यम् अस्ति। मुख्यमन्त्रिणा स्थितिः स्पष्टीकृता यत् एतत् विधेयकं भारतस्य संविधानस्य अनुच्छेदस्य ३०९ तः अधिकारं गृह्णाति, यस्य अन्तर्गतं सार्वजनिककर्मचारिणां नियुक्ति-सेवा-स्थितयः नियन्त्रिताः सन्ति। हिमाचले अनुबन्धाधारितनियुक्तयः २००३ तमे वर्षे आरब्धाः, नियुक्तिपत्रेषु सेवानियमाः स्पष्टतया उक्ताः। अनुबन्धस्य अन्तर्गतं तेषां कार्यकालः नियमितकर्मचारिणां कृते उपलब्धानां वरिष्ठतायाः अन्यलाभानां वा कृते न गण्यते इति कर्मचारिणः अवगताः आसन्।

## हरियाणायाः पूर्वमुख्यमन्त्रिणः ओमप्रकाशचौटाला इत्यस्य निधनम्, ८९ तमे वर्षे अन्तिमश्वासं गृहीतवान्



हिमसंस्कृतवार्ताः। हरियाणा-राज्यस्य पूर्वमुख्यमन्त्री भारतीय-राष्ट्रिय-लोकदलस्य वरिष्ठः नेता च ओम-प्रकाश-चौटालागुरुग्राम्-नगरे दिवङ्गतः। सः नवाशीतिः वर्षीयः आसीत्। हरियाणा-राज्यस्य पञ्चवारं मुख्यमन्त्री पदासीनः पूर्वउप-प्रधानमन्त्रिणः देवीलालस्य पुत्रः च ओम प्रकाश चौटाला स्वीये गुरुग्राम-निवासे हृदयाघातेन पीडितः, तत्क्षणमेव चिकित्सालयं नीतः, परन्तु रक्षितुं न शक्तः। पञ्चत्रिंशदधिक-नवदश-शततमे वर्षे जनवरीमासे जनितः चौटाला वर्यः भारतीय-राजनीतेः प्रमुखेषु अन्यतमः आसीत्। प्रधानमन्त्री नरेन्द्र मोदी ओम प्रकाश चौटाला वर्यस्य निधनविषये दुःखं प्रकटितवान्। स्वीये सन्देशे श्रीमोदी अवदत् यत्, सः बहुभ्यः वर्षेभ्यः राज्यराजनीतौ सक्रियः आसीत्, चौधरी देवीलालस्य कार्यम् अग्रे नेतुं निरन्तरं प्रयतते स्म इति। प्रधानमन्त्री तस्य शोकाकुलपरिवाराय, समर्थकेभ्यः च संवेदनां प्रकटितवान्।

## संस्कृतं देवभाषा वर्तते अतः वयं मानवाः अपि यदि स्वीयनित्यजीवने देवभाषया व्यवहारं कुर्मः तर्हि अस्मासु अपि अवश्यं देवत्वं प्रतिष्ठापितं भविष्यति - पूज्याः श्रीशिवैय्यास्वामिवर्याः



**हिमसंस्कृतवार्ताः - आचार्यः विशालप्रसादभट्टः अनन्तपुरम् , आन्ध्रप्रदेशः।** गुरुवासरे अनन्तपुरस्थे श्रीशिवकोटिमन्दिरे श्रीपीठे केन्द्रीयसंस्कृतविश्वविद्यालयेन आन्ध्रप्रदेशकेन्द्रीयविश्वविद्यालये सञ्चालितं संस्कृताध्ययनकेन्द्रम् अपि च संस्कृतभारती-अनन्तपुरम् इत्यनयोः संयुक्ततत्त्वावधानेन समायोजितस्य दशदिवसीयसंस्कृतसम्भाषणशिबिरस्य समुद्घाटनं सञ्जातम् । कार्यक्रमस्यास्य शुभारम्भः वैदिकमङ्गलाचरणपुरस्सरं ध्येयमन्त्रेण समभवत्। तत्र प्रशिक्षार्थिभिः कार्यक्रमाध्यक्षरूपेण समागतानां श्रीशिवकोटिमन्दिरस्यास्य संस्थापकानां पूज्यानां श्रीमतां शिवैय्यास्वामिचरणानां सानिध्यम् आशीर्वचांसि च सम्प्राप्तानि।अनन्तरं केन्द्रशिक्षकेण आचार्यविशालप्रसादभट्टेन सविस्तरं संस्कृतस्य वैशिष्ट्यं प्रतिपाद्य पठतसंस्कृतम् इति शिबिरगीतगायनेन वर्गस्य प्रारम्भः विहितः । तदनु शिबिरशिक्षकेण आचार्यविशालप्रसादभट्टेन प्रथमदिवसस्य पाठ्यबिन्दूनाम् उपस्थापनम् अभ्यासः प्रयोगः इति सोपानक्रमेण संस्कृतेन परस्परं परिचयः, एतत्तच्छब्दयोः त्रिषु लिङ्गेषु पाठनं कृतम्। एवं क्रमशः अग्रिमबिन्दूनामपि पाठनं विहितम्। शिबिरेऽस्मिन् १८ सामाजिकाः महिलाः पुरुषाश्चोपस्थाय समुत्साहेन भागं गृह्णन्ति। अन्ते सर्वैरपि प्रशिक्षार्थिभिः सम्भूय शान्तिमन्त्रः समुच्चारितः। जयतु संस्कृतं, जयतु भारतम्।

## KKSU Ramtek : कविकुलगुरु-कालिदाससंस्कृतविश्वविद्यालये

### शोधप्रवेशपरीक्षायै (RET) आवेदनानि आमन्त्रितानि



कविकुलगुरुकालिदास संस्कृतविश्वविद्यालयः, रामटेकः 2024-25 सत्रस्य कृते विद्यावरीधि (पीएच.डी.) उपाधिं प्रवेशार्थं शोधप्रवेशपरीक्षा (RET) आयोजयिष्यति। शोधप्रवेशपरीक्षा विश्वविद्यालयानुदानायोगस्य, न्यूनतममानकानां,उपाधिविनियम-2024 पीएच.डी.उपाधिप्रक्रियायाः च आधारेण भविष्यति। शोधप्रवेशपरीक्षा संस्कृतभाषा तथा साहित्यं, शिक्षा, योगशास्त्र, वेदाङ्गज्योतिषं, संस्कृतव्याकरणं, वेदः तथा दर्शनशास्त्र, हिन्दू-अध्ययनं, कीर्तनशास्त्र, नृत्यम् आदिषु विषयेषु 25 जनवरी 2025 तमे दिनांके आयोजिता भविष्यति। शोधप्रवेशपरीक्षायाः (RET) परीक्षाप्रपत्राणि विस्तृतसूचना च https://kksanskrituni.digitaluniversity.ac/Content.aspx?ID=29562 विश्वविद्यालयस्य जालपुटे द्रष्टुं शक्यते। आवेदनपत्रं दातुं अन्तिमातिथिः 5 जनवरी 2025 भविष्यति । अभ्यर्थिनः परीक्षाशुल्कं 1500/- ऑनलाइन लिङ्कद्वारा दातुं शक्नुवन्ति। ये आवेदकाः शोधप्रवेशपरीक्षायै (आरईटी कृते) २०२४ तमस्य वर्षस्य जुलैमासे आवेदनपत्रं प्रदत्तवन्तः तेषां पुनः आवेदनस्य आवश्यकता नास्ति।

## HP Vidhan Sabha Winter Session: युवभ्यः जीविकां याचमानाः विधानसभापरिसरे आन्दोलने उपविष्टा भाजपा-विधायकाः




**हिमसंस्कृतवार्ताः - धर्मशाला।** विधानसभासत्रस्य तृतीये दिने भाजपाविधायकाः सत्रस्य आरम्भात् पूर्वमपि हस्तेषु प्लेकार्डम् इति गृहीत्वा विधानसभायाः बहिः विरोधं कृतवन्तः। भाजपाविधायकाः हस्तेषु प्लेकार्ड इति गृहीत्वा विरोधं कृत्वा युनां कृते ५ लक्षं कार्याणि प्रदातुं, अतिथिशिक्षकनीतिं निवृत्तं कर्तुं, निष्कासितानां बाह्याधार-कर्मचारिणां पुनः नियुक्तिम्, करुणा- आधारेण कार्य-व्यवस्थां च इत्यादीनां याचनानाम् आग्रहं कृतवन्तः।अस्मिन् अवसरे विपक्षनेता जयरामठाकुरः अवदत् यत् काङ्ग्रेससर्वकारेण सत्तां प्राप्तमात्रेण प्रथममन्त्रिमण्डले कार्याणि प्रदातुं घोषणा कृता। यत्र काङ्ग्रेससर्वकारेण ५ लक्षं कार्याणि प्रदातुं प्रतिज्ञा कृता आसीत् तत्र सत्तां प्राप्य बाह्याधारेण नियुक्ताः कर्मचारिणः बहिः क्षिप्ताः। राज्ये रिक्तानि स्थितानि प्रायः १.५ लक्षं पदानि निरस्तीकृतानि। एतत् कृत्वा हिमाचलस्य अनुद्योगियुवकैः सह सर्वकारेण क्रूरः विनोदः कृतः।

एतदेव न, अधुना सर्वकारेण अतिथिशिक्षकाणां नियुक्तेः घोषणां कृत्वा युनां वञ्चनं कृतम् अस्ति। जयरामठाकुरः उक्तवान् यत् भाजपा युनां स्वरः भूत्वा स्वस्य विरोधं प्रदर्शयन् अस्ति। सः अवदत् यत् हिमाचलप्रदेशस्य युनां कृते युद्धं सदनस्य अन्तः अपि च बहिः अपि भविष्यति। काङ्ग्रेससर्वकारस्य प्रतिज्ञाः एकैकशः उजागरिताः भवन्ति, भाजपा युनां स्वरः भूत्वा विधानसभायाः अन्तः बहिश्च विरोधं करिष्यति।

## लोकसभा इव हिमाचलविधानसभायां प्रथमवारं शून्यकालः आयोजितः, विधायकाः प्रश्नान् पृष्टवन्तः



हिमसंस्कृतवार्ताःधर्मशाला। हिमाचलप्रदेश विधानसभायाः शिशिरसत्रस्य तृतीयदिने ऐतिहासिकः आरम्भः अभवत्। हिमाचलसभायाः इतिहासे प्रथमवारं सत्रस्य तृतीयदिने शुक्रवासरे शून्यकालः आरब्धः। प्रातः ११ वादनतः मध्याह्न १२ पर्यन्तं प्रश्नहोरायाः अनन्तरं लोकसभा-राज्यसभा-पङ्क्तौ इव अर्धहोरापर्यन्तं सदने शून्यकालस्य आयोजनं कृतम्। अस्मिन् काले सप्त विधायकाः स्वस्वक्षेत्रस्य समस्याः उत्थापितवन्तः। शून्यकालस्य अस्मिन् प्रकरणे लाहौलस्पीतिविधायिका अनुराधा राणा प्रथमतया प्रश्नं उत्थापितवती। ततः विधायकः जनकराजः, केवलसिंह पठानिया, सुखराम चौधरी, संजयरत्नः, त्रिलोक जम्बालः, हरदीपसिंहः बाबा सदने प्रश्नान् पृष्टवन्तः।

अस्मिन् समये विधानसभाध्यक्षः अवदत् यत् लोकसभायाः पङ्क्तौ इव हिमाचलविधानसभायां अपि शून्यकालः आरब्धः। सः अवदत् यत् शून्यकालस्य आरम्भेण विधायकाः प्रश्नहोरायाः अतिरिक्तम् अर्धहोरापर्यन्तं स्वक्षेत्रस्य समस्याः उत्थापयितुम् अवसरं प्राप्नुयुः। एतदर्थं सत्रस्य आरम्भात् सार्धैकहोरा पूर्वं सदस्यैः सूचितं कर्तव्यं भविष्यति इति सः अवदत्। अस्मिन् कालखण्डे प्रथमदशसदस्यानां प्राधान्यं भविष्यति। यदि सम्बन्धितः मन्त्री एतस्य उत्तरं दातुम् इच्छति तर्हि सः तत् कर्तुं शक्नोति, अन्यथा पश्चात् अपि तस्मै सूचना प्रदत्ता भविष्यति। इतरथा विपक्षनेता जयरामठाकुरः, राजस्वमन्त्री जगतसिंहः नेगी, स्वास्थ्यमन्त्री कर्णलः धनीरामशाण्डिलः अपि हिमाचलविधानसभायां प्रथमवारं शून्यकालस्य आरम्भे सभापतिम् अभिनन्दितवन्तः।

# ।। श्रीरामायणकथा ।।



## उत्तरकाण्डम्! (सप्तचत्वारिंशः सर्गः) सीतायाः प्रसवः, वाल्मीकिद्वारा सीतायाः पुत्रयोः नामकरणम्। (द्वितीयः खण्डः)

राज्ञः शासनात् पाचकाः तूर्णं हि पाचनकार्ये संलग्नाः अभवन्। इत्यवसरे सः राक्षसोऽपि पाचकवेषं धृत्वा मनुष्यमांसं पचन् राजानम् अब्रवीत् राजन्! इदं सुस्वादु सामिषं हविष्यम् अन्नं चापि सज्जम् अभवत्। ततः पत्न्या मदयन्त्या सह राजा मित्रसहः राक्षसेन आहृतं तद् भोजनम् ऋषये वसिष्ठाय अददात्। भोजने नरमांसम् अस्ति इति ज्ञात्वा क्रोधेन महताविष्टः विप्रः वसिष्ठः अब्रवीत् हे राजन्! यस्मात् त्वं मह्यम् एतद्भोजनं दातुमिच्छसि तस्मात् एतद् भोजनं तव भविष्यति इति संशयः नास्ति। ततः राजा कुपितः भूत्वा हस्ते जलम् आदाय विप्रं वसिष्ठं शप्तुम् उद्यतः अभवत् परन्तु तस्य भार्या तम् अवारयत् अब्रवीत् च हे राजन्! भगवानृषिः वसिष्ठः अस्माकं प्रभुः, अतः त्वं देवतुल्यं पुरोधसं प्रतिशप्तुं न शक्नुयाः। ततः राजा मित्रसहः तेजोबलसमन्वितं क्रोधमयं जलं यदा व्यसर्जत् तदा तज्जलं तस्य पादौ अपतत्। तेन राज्ञः पादौ कल्माषतां गतौ। तदा प्रभृति सः राजा सौदासः कल्माषपादः इति नाम्ना ख्यातः अभवत्। ततः राजा मित्रसहः पत्न्या सह विप्रं वसिष्ठं मुहुर्मुहुः प्रणिपत्य ब्रह्मरूपिणा राक्षसेन यदुक्तं पुनः तद् ऋषिं वसिष्ठम् अब्रवीत्।



हिमसंस्कृतवार्ता, प्रदीपः
pradipnath997@gmail.com

राक्षसेन विकृतं राज्ञः तद्वचनं श्रुत्वा ऋषिः वसिष्ठः पुरुषर्षभं राजानं पुनरब्रवीत् - मया रोषेण यदिदं वचः व्याहृतं तद् वृथा कर्तुं न शक्यं परन्तु अहं तुभ्यं वरं प्रदास्यामि। द्वादशवर्षाणि यावत् कालः यदा व्यतीतः भविष्यति तदा तव शापस्य अन्तः भविष्यति। अपिच हे राजेन्द्र! मत्प्रसादाच्च व्यतीतं कालं त्वं न स्मरिष्यसि। एवं सः राजा तं शापम् उपभुज्य पुना राज्यं लब्ध्वा प्रजाः अन्वपालयत्। हे राघव! आश्रमस्य समीपतः यन्मां पृच्छसि एतत् शुभं यज्ञायतनं तस्य कल्माषपादस्य आसीत्। तस्य राज्ञः तां सुदारुणां कथां श्रुत्वा महर्षिम् अभिवाद्य शत्रुघ्नः पर्णशालां प्राविशत्। रघुनन्दनः शत्रुघ्नः यस्यां रात्रौ महर्षेः पर्णशालां समाविशत् तस्यां रात्रौ सीता पुत्रद्वयं प्रासूत। ततः मुनिपुत्राः अर्द्धरात्रसमये महर्षेः वाल्मीकेः समीपं गत्वा सीतायाः शुभं प्रसवम् अब्रुवन् हे भगवन्! रामपत्नी देवी सीता पुत्रद्वयम् असूत। तयोः भूतविनाशिनीं रक्षां कुरु। तेषां तद्वचनं श्रुत्वा महर्षिः वाल्मीकिः तूर्णं समुपागमत्।

हिमसंस्कृतवार्ताः, डॉ. विवेक शर्मा, जोगिन्द्रनगरम्

## सामान्यज्ञानम्

प्रश्नः 1. भारते द्वारकाधीशमन्दिरम् कुत्र अस्ति?
उत्तरम् : गुजरातप्रान्ते
प्रश्नः 2. 'कर्णभारम्' इत्यस्य रचयिता कः अस्ति?
उत्तरम् - 'भासः'।
प्रश्नः 3. राष्ट्रध्वजे केन्द्रीयः वर्णः कः?
उत्तरम्- श्वेतः।
प्रश्नः 4. 'राष्ट्रध्वजे सर्वोपरिः कः वर्णः अस्ति?
उत्तरम्- 'केसरवर्णः।
प्रश्नः 5. 'राष्ट्रध्वजे अधः कः वर्णः अस्ति?
उत्तरम्- हरितवर्णः

## "लौकिकन्यायकोशः" "भ्वादिन्यायः"

व्याकरणे भू- इत्यादिधातूनाम् उपसर्गयोजनेन विभिन्नाः अर्थाः भवन्ति इति प्रतिपाद्यते। एवमेव एकमेव ब्रह्म विभिन्नैः उपाधिभिः युक्तं सत् भिन्नम् इव भासते।
प्र+ भू- प्रभवति, अनु+ भू- अनुभवति, परि+ भू- परिभवति, सम्+ भू- सम्भवति।

डा वर्षा प्रकाश टोणगांवकरः पुणे/ महाराष्ट्रम्





## विवाहस्य मोदकं यः खादिष्यति स पश्चातापं करिष्यति, न खादिष्यति सः अपि पश्चातापं करिष्यति।

हास्यकणिका विशेषज्ञा- विदुषी अग्रवाल
प्रेरणास्रोतः- महाभागः महेन्द्रमिश्रमहोदयः

एकं सुभाषितं प्रचलितम् अस्ति- विवाहस्य मोदकं यः खादिष्यति स पश्चातापं करिष्यति, न खादिष्यति सः अपि पश्चातापं करिष्यति- परञ्च एतत् सत्यं नास्ति। तर्हि सत्यं किम्? अन्यस्य 'काजू कतली' इत्यस्याम् येषां दृष्टिः अस्ति ते एव विवाहस्य मोदकं खादित्वा पश्चातापं कुर्वन्ति।

# कालका-शिमला रेलवे-मार्गे धाविता आरक्षित- अवकाश- विशेष- लौहपथगामिनी



हिमसंस्कृतवार्ताः- डॉ. पद्मनाभः, शिमला।

विश्वधरोहरे कालका-शिमला-रेलमार्गे शुक्रवासरे आरक्षित- हॉलीडे- विशेष- लौहपथगामिन्याः संचालनं प्रारब्धम्। रेलवे-मण्डलस्य प्रदत्त- कार्यक्रमानुसारं ५२४४३ क्रमांकस्य रेलयानं कालकातः प्रातः ८:०५ वादने प्रस्थितम्। एतद् रेलयानं सोलने १०:४५ वादने प्राप्तम्, यत्र २ निमेषानां विलम्बेन स्थगित्वा शिमलायाः दिशि प्रस्थितम्। रेलयानस्य यात्रा शिमलायां १:४० वादने सम्पूर्णा जाता, यत्र ८१ यात्रिकाः गतवन्तः। गमनकाले धर्मपुरं, बड़ोग, सोलनं, कंडाघाट, समरहिल इत्यस्मिन् स्थानकेषु स्थगनं भविष्यति। कैथलीघाटे क्रॉसिंग-कारणेन एकं स्थगनं अपि भविष्यति। ५२४४४ क्रमांकस्य रेलयानम् शिमलातः सायं ४:५० वादने कालकायाः दिशि प्रस्थास्यति। आगमनकाले समरहिलं, कंडाघाटं, सोलन, बड़ोगः, धर्मपुरम् इत्येतेषु स्थानेषु स्थगनं भविष्यति। यानं रात्रौ ९:४५ वादने कालकायां आगमिष्यति।

रेलवेमण्डलस्य सोलनस्थानकस्य अधीक्षकः दिनेश शर्मा उक्तवान् यत् क्रिसमस-नववर्षयोः उत्सवमभिलक्ष्य एतद् हॉलीडे-विशेष-रेलयानं प्रारब्धम्। एतद् रेलयानम् एकस्मिन् दिने गमनं च आगमनं च करिष्यति। पर्यटकानां संख्या-वृद्धिं परिगण्य रेलयानस्य संचालनं क्रियते। २८ फरवरी पर्यन्तं एतद् रेलयानं सततं गमिष्यति।

### एतद् भाटकं भविष्यति-

रेलयानस्य द्वयोः सामान्यकक्षयोः भाटकं ७५ रूप्यकाणि निश्चितम्। पर्यटककक्षस्य भाटकं ९४५ रूप्यकाणि, प्रथमश्रेणी-कक्षस्य भाटकं ७९० रूप्यकाणि च निर्धारितमस्ति।

### पर्यटकानां प्रथमा रुचिः- टॉय-रेलयानम्

वर्षस्य अवशिष्ट-अवकाशानाम्, क्रिसमसस्य, नववर्षस्य च उत्सवाय पर्यटकाः कालकातः शिमलायाः गमनागमनं कर्तुम् आरब्धवन्तः। पर्यटकानां संख्यावृद्धिं दृष्ट्वा विशेष-लौह- पथगामिन्याः संचालनं क्रियते। ज्ञातव्यम् यत् प्रतिवर्षं सहस्त्रशः पर्यटकाः क्रिसमस-नववर्षयोः शिमलायां आगच्छन्ति। ततः परिवहनमार्गस्य अपेक्षया टॉय-रेलयानं पर्यटकानाम् प्रथमा रुचिः भवति, यतोहि वक्रपर्वतानां मध्ये यदा रेलयानं गच्छति तदा दृश्यम् अत्युत्तमं भवति।

## चलचित्रवार्ता- सिकंदर चलच्चित्रं पश्चाद् सलमानखानः एतेषु चलच्चित्रेषु दृश्यते



हिमसंस्कृतम्:- जगदीशडाभी (मुम्बई)

बॉलीवुडाभिनेता सलमान खानः सम्प्रति सिकंदर चलच्चित्रस्य चित्रोतलनं कर्तुं व्यस्तः अस्ति। एतत् महत् आय-व्ययकेन निर्मितं चलच्चित्रम् अस्ति। सलमानस्य एतत् चलच्चित्रं गजनी चलच्चित्रस्य निर्देशकस्य ए. आर. मुरुगदास इत्यस्य निर्देशने निर्मितं भवति। सलमानस्य एतत् चलच्चित्रम् आगामिवर्षे ईदादिने प्रदर्शितं भविष्यति। अस्य चलच्चित्रस्य अनन्तरं सलमानः स्वस्य अग्रिमचलच्चित्रेषु कार्यम् आरभेत्। सलमानस्य समीपे इदानीं बहु चलच्चित्राणि नास्ति, परन्तु तस्य केचन बृहत् चलच्चित्राणि सन्ति। दक्षिणस्य प्रसिद्धस्य निर्देशकस्य एटली इत्यस्य चलच्चित्रे सलमानखानः दृश्यते। अस्य चलच्चित्रस्य नाम एके १६ अस्ति। एतत् चलच्चित्रस्य अस्थायी नाम अस्ति । अस्मिन् चलच्चित्रे सलमानेन सह दक्षिणस्य एकः बृहत् तारकः अपि दृश्यते। इदं चलच्चित्रं महत् आय-व्ययकेन निर्मितं भविष्यति। वाइआरएफ टाइगर बनाम पठानं कर्तुं गच्छति। यद्यपि अद्यापि न भवितुं गच्छति। कदाचित् अस्य चलच्चित्रस्य कार्यं पठान २ इत्यस्य अनन्तरं आरभ्यते। अस्मिन् सलमानः शाहरुखखान इत्यनेन सह दर्शनं दास्यति । दबङ्ग ४ इत्यस्य निर्माणस्य वार्ता अपि निरन्तरं आगच्छति। अस्मिन् सलमानः पुनः चुलबुलपाण्डेयस्य भूमिकायां दृश्यते।